दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-124 | 1 | फरवरी 24, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्दः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् फाल्गुणशुक्लसप्तमी
फाल्गुण 12 प्रविष्ठांशः मङ्गलमयः भवेत्

2 हिमाचलप्रदेशे पञ्चायतनिर्वाचने नवाक्रमावली (रोस्टरः), २०११-जनगणना भविष्यति आरक्षणस्य आधारः

3 इन्दिरा गान्धी मातृ शिशु सङ्कल्प योजनां प्रारप्स्यते सर्वकारः, २०७ कोटिरूप्यकाणां भविष्यति व्ययः

5 भूतपूर्व-रेलमन्त्री, राज्यसभा-सांसदः च मुकुलरायः दिवङ्गतः; प्रधानमन्त्रिणा गृहमन्त्रिणा च शोकः प्रकटितः

## राजगोपालाचार्यस्य प्रतिमायाः कृतम् राष्ट्रपतिद्रौपदीमुर्मु-वर्यया अनावरणम्



**हिमसंस्कृतवार्ताः** - प्रथम-भारतीय-शासकस्य जीवनस्य रिक्थस्य च राजाजी-उत्सवः राष्ट्रपतिः भवने सुतरां परिपाल्यते । अस्मिन् अवसरे राष्ट्रपतिः द्रौपदीमुर्मुः नवदेहलीस्थे राष्ट्रपति भवने स्वतन्त्र-भारतस्य प्रथमः तथा एक एव भारतीयः "राज्यपालजनरलः" चक्रवर्ती राजगोपालाचारी-वर्यस्य प्रतिमायाः अनावरणं कृतवती। इयं प्रतिमा अशोक-मण्डपस्य समीपस्थे ग्रैंड्-ओपन सोपानं निकषा स्थितास्ति, एषा एडविन् लुटियन्स् - इत्यस्याः प्रतिमायाः स्थाने प्रतिस्थापिता वर्तते।राष्ट्रपतेः मुर्मु-वर्यायाः कथनानुसारेण एषः उपक्रमः औपनिवेशिक-मानसिकतायाः अवशेषान् परित्यज्य भारतस्य सांस्कृतिक-वैभवस्य, पुरातन-रिक्थानां कालातीतपरम्पराणां च गौरवपूर्ण-सम्मानं स्वीकरोति, अथ च यैः राष्ट्रभक्तैः असाधारण योगदानैः भारतमातुः सेवा कृता तेषां सम्मानार्थम् अपि एषः उद्यमः श्लाघनीयः अस्ति। एषः उपक्रमः भारतस्य गौरवपूर्ण इतिहासस्य स्मरणं कारयति, राष्ट्रभक्तानां वीरतायाः, सेवाभावस्य, सांस्कृतिक-परम्पराणां अमूल्ययोगदानं जनसमक्ष प्रस्तौति। अत्रावसरे राष्ट्रपतिना आशा व्यक्तीकृता यत् देशवासिनः राजगोपालाचार्यस्य जीवन रिक्थेन प्रेरिताः सन्तः राष्ट्र सर्वोपरि मत्वा, राष्ट्रभक्तिभावेन अग्रे प्रगच्छेयुः। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् राजाजी उत्सवः एकः अद्भुतः उपक्रमः अस्ति, येन राष्ट्राय सी. राजगोपालाचारी वर्यस्य समृद्धस्य योगदानस्य विभिन्नाः पक्षाः प्रकाश्यन्ते। सामाजिक-अन्तर्जालीये पटले लिखिते सन्देशे प्रधानमन्त्रिणा राजाजी-उत्सवं प्रशंसता उक्तं यत् अयं प्रयासः, नियति-निर्धारकेभ्यः सम्मानं प्रददाति। सः अवोचत् यत् राजाजी महान् विद्वान्, स्वातन्त्र्ययोद्धा, चिन्तकः, प्रशासकः च आसीत्।

## प्रधानमन्त्रिणा पश्चिमबङ्ग-राज्यस्य जनतां प्रति पत्रं लिखित्वा राज्यस्य विविध-समाहानानि उल्लेखितानि




**हिमसंस्कृतवार्ताः** - प्रधानमन्त्री नरेन्द्रमोदी पश्चिमबङ्गराज्ये आगामि-विधानसभा-निर्वाचनस्य पूर्वसन्ध्यायां राज्यजनतां प्रति मुक्तपत्रं प्रेषितवान्। तेन पत्रे गतदशके केन्द्र-सर्वकारस्य जनकल्याण-विकास-परियोजनानां विवेचनं कृतम्। प्रधानमन्त्रिणा तस्मिन् पत्रे जन-धन योजना, उज्ज्वला योजना, आयुष्मान-भारत-योजना, स्वच्छ-भारत-अभियानम् इत्यादीनां योजनानां उल्लेखः कृतः। तेन उक्तं यत् असंख्य-परिवाराः बैंक-सेवा, महानसीय-वात-ईन्धन-संयोजनं, सुलभ-स्वास्थ्य सेवां च प्राप्तवन्तः सन्ति। कृषक-कल्याणात् युव-सशक्तीकरण-पर्यन्तं, अवसंरचना-विकासात् औद्योगिक-निवेश-वृद्धि-पर्यन्तं, विविध-क्षेत्रेषु सततं कार्यं कृतमिति प्रधानमन्त्रिणा प्रोक्तम्। पत्रे नागरिकता-संशोधन-अधिनियमः तथा सीमासुरक्षा-विषयः अपि उल्लिखितः। प्रधानमन्त्रिणा जनानाम् आह्वानं कृतं यत् राज्यस्य भावि-पीठिकायाः कर्णधाराणाम् उज्ज्वल भविष्यार्थम् अस्माभिः जनतायाः समर्थनम् अपेक्ष्यते।

## बाङ्ग्लादेश-राष्ट्रपतिना मोहम्मदशहाबुद्दीनेन पूर्व-सर्वकारस्य मुख्य-परामर्शके मोहम्मद-यूनुसे सांविधानिक-प्रक्रिया-लङ्घनस्य आरोपः आरोपितः

**हिमसंस्कृतवार्ताः** - बाङ्ग्लादेश-राष्ट्रपतिना मोहम्मदशहाबुद्दीनेन पूर्व-सर्वकारस्य मुख्य-परामर्शक मोहम्मद यूनुसे सांविधानिक-प्रक्रियालङ्घनस्य आरोपः आरोपितः। मोहम्मदशहाबुद्दीनेन मुहम्मद् यूनुसे पुनः पुनः सांविधानिक प्रक्रियाणां उल्लंघनस्य सम्यक्तया तेषां न परिपालनस्य च आरोपाः आरोपिताः । एकस्यां वार्तापत्रिकायां प्रदत्ते साक्षात्कारे, सः यूनुसे पर्याप्तं समर्थनं विना, आपत्कालिकान् आवश्यकोपायान् च विना अनेकेषाम् अध्यादेशानां प्रवर्तनस्य आरोपपूर्वकं तस्य निन्दाम् अकरोत्।

## तेहरान-स्थितेन भारतीय-दूतावासेन भारतीयानां सुरक्षां ध्यात्वा भारतीय-नागरिकाः ईरान-देशस्य त्यागार्थम् आहूताः, प्रदर्शन-प्रदेशेषु न गन्तुमपि भारतीयाः सञ्चेतिताः



**हिमसंस्कृतवार्ताः** - ईरानदेशस्य राजधान्यां स्थितेन भारतस्य राजदूतावासेन तत्र स्थिताः सर्वेऽपि भारतीय-नागरिकाः विनिर्दिष्टाः यत्ते यथोपलब्ध-यातायात-साधनैः, यथा वाणिज्यिक-उड्डयन-विमानैः तस्मात् देशात् निर्गच्छन्तु । दूतावासेन जनवरी चतुर्दश्यां प्रसारिता स्व-सूचना पुनः प्रख्यापिता अस्ति, यत्र सर्वे भारतीय-नागरिकाः भारतीय-मूलस्य जनाः च सतर्काः सावधानाः च भवितुम् अध्यर्थिताः सन्ति। साकमेव विरोध-प्रदर्शनस्य क्षेत्रेभ्यः दूरे स्थातुमपि ते प्रार्थिताः वर्तन्ते। अथ च दूतावासेन साकं संपर्कः स्थापयितुमपि जनाः प्रार्थिताः सन्ति । युगपदेव जागरूकीभूय च स्थानीय-सञ्चार-माध्यमेषु अपि कुत्र किं किं जाजायते इति विषये निरीक्षणं कर्तुं जनाः निर्दिष्टाः सन्ति । अत्रान्तरे यात्रा-प्रपत्रकाणि परिचय-पत्राणि च भारतीयाः सर्वदा स्वपार्श्वे एव स्थापयन्त्विति विनिर्दिष्टमस्ति। सङ्कटापन्ने क्षणे जनानां सहायतार्थं दौरभाषयन्त्रस्य सहायता-संख्याश्चापि प्रसारिताः सन्ति । प्रधानमन्त्री मोदी वर्यः अपि नागरिक-सुरक्षायाः महत्त्वं निध्याय समग्रे घटनाक्रमे नैजीं दृष्टिं स्थापयति।

## गुयाना-देशस्य उपराष्ट्रमन्त्रिणा भरत-जगदेवेन उपराष्ट्रमन्त्रिणा सी.पी. राधाकृष्णन् महोदयेन सह मेलनं कृतम्

गुयाना-देशस्य उपराष्ट्रमन्त्री भरतजगदेवः नवदिल्ल्यां भारतस्य उपराष्ट्रमन्त्रिणा सी.पी. राधाकृष्णन् महोदयेन सह मेलनं कृतवान्। 'सोशल मीडिया' इत्यत्र एकां सूचनां प्रसारयन् श्री राधाकृष्णन् अवदत् यत् अस्मिन् अवसरे तौ विविधक्षेत्रेषु भारत-गुयाना देशयोः सम्बन्धान्सुदृढीकर्तुंविषयेचर्चां कृतवन्तौ।

## सुभाषितम्

**आयुरत्यन्तचपलं**
**मृत्युरेकान्तनिष्ठुरः।**
**तारुण्यं चातितरलं**
**बाल्यं जड़तया हतम्॥**

आयु अत्यन्त चपल है, मृत्यु पूर्ण क्रूर है, युवावस्था अतिचंचल है और बाल्यावस्था अज्ञानता में ही नष्ट हो जाती है, अतः जीवन के प्रत्येक काल को सार्थक करके जीना चाहिए।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## सर्वानन्द-सोनोवालेन तमिलनाडु-राज्यस्य तूतीकोरिन-पोतपत्तने विविध-पत्तन-परियोजनानाम् उद्घाटनं शिलान्यासश्च कृतः

**हिमसंस्कृतवार्ताः** - केन्द्रीय-जलपोतयान-जलमार्गमन्त्रिणा सर्वानन्द-सोनोवालेन तमिलनाडु-राज्यस्य तूतीकोरिन्-पोतपत्तने प्रायः पञ्चदशशत-कोटिरूप्यक-मूल्यानां विविध-पत्तन-परियोजनानाम् उद्घाटनं शिलान्यासश्च कृतः। एतासु परियोजनासु वी.ओ.सी. सामुद्रिक-रिक्थ-संग्रहालयस्य निर्माणम्, अष्ट-मेगावाट-क्षमतायुक्त-पवन-ऊर्जा-संयन्त्रस्य स्थापना, प्रतिहोरं पञ्च-मेगावाट क्षमतायुक्त-विद्युत्-सञ्चयन-प्रणाल्याः शिलान्यासः, पत्तने कॉर्पोरेट-सामाजिक-उत्तरदायित्व-परियोजनानां शुभारम्भश्च समाविष्टाः सन्ति।

# हिमाचलप्रदेशे पञ्चायतनिर्वाचने नवाक्रमावली (रोस्टरः), २०११-जनगणना भविष्यति आरक्षणस्य आधारः




**हिमसंस्कृतवार्ताः- शिमला** । हिमाचलप्रदेशे पञ्चायतनिर्वाचनसम्बद्धः संशयः अधुना समाप्तः अस्ति। पञ्चायतराजसंस्थासु अस्मिन् काले नूतनरूपेण आरक्षण-क्रमावलीः प्रवर्तिष्यते। पञ्चायतराजविभागेन स्पष्टं कृतं यत् अनुसूचितजाति- जनजाति- महिलानाम् आरक्षणाय २०११-वर्षस्य जनगणना आधाररूपेण स्वीक्रियते, ओबीसी-वर्गस्य तु १९९३-९४-वर्षयोः सर्वेक्षणं प्रमाणरूपेण ग्राह्यं भविष्यति।पञ्चायतप्रधानस्य आरक्षणाय विकासखण्डः एककरूपेण गृह्यते। अस्य सूत्रस्य आधारेण प्रत्येकस्मिन् विकासखण्डे प्रधानपदानां आरक्षणं तत्रस्थित- जनसंख्या- अनुपातेन निर्धार्यते। विभागेन ३१ मार्चपूर्वम् आरक्षण-रोस्टरः प्रकाशनीयः अस्ति। नूतनपञ्चायतानां तथा जिलापरिषदः पुनर्गठन- पुनःसीमाङ्कनसम्बद्धा अधिसूचना अपि निर्गता अस्ति। अस्मिन् विषये सप्तदिनान्तरे जनानाम् आपत्तयः परामर्शाश्च आमन्त्रिताः सन्ति। एतदर्थं सर्वेषाम् उपायुक्तानां प्रति स्पष्टनिर्देशाः दत्ताः सन्ति।
उल्लेखनीयम् अस्ति यत् अद्यावधि रोस्टरविषये असमञ्जसावस्था आसीत्। पञ्चायतसमितौ तथा जिलापरिषद्स्तरे महिलाभ्यः पञ्चाशत्-प्रतिशतं आरक्षणं भविष्यति। ***पिछडावर्गाय*** अधिकतमं पञ्चदश- प्रतिशतपर्यन्तम् आरक्षणस्य प्रावधानम् अस्ति। पञ्चायतप्रधान, पञ्चायतसमित्याः अध्यक्षः, जिलापरिषदः अध्यक्षः इत्यादिषु पदेषु अपि एष एव नियमः प्रवर्तते। एतेषां पदानाम् आरक्षणं अनुसूचितजाति- जनजाति- ***पिछडावर्ग***- महिलाभ्यः क्रमशः परिवर्तनीय-रोटेशन-पद्धत्या भविष्यति। यदि काचित् पञ्चायत् अथवा वार्डः गतवारे कस्यचित् वर्गस्य कृते आरक्षितः आसीत्, तर्हि अस्मिन् वारे सामान्यः भविष्यति। सम्पूर्णा आरक्षणप्रक्रिया २०११-जनगणनायाः आधारेण प्रवर्तिष्यते।

**पञ्चायतप्रधानस्य आरक्षण-क्रमःनिर्णयः**

नूतनप्रावधानानुसारं पञ्चायतप्रधानस्य आरक्षणगणना विकासखण्डस्तरे अनुसूचितजाति- जनजाति- पिछडावर्ग- जनसंख्या- अनुपातेन भविष्यति। प्रथमं अनुसूचितजात्यै आरक्षण- क्रमावली प्रवर्तिष्यते। यासु पञ्चायतासु अनुसूचितजातिजनसंख्या अधिका अस्ति, तासु प्रधानपदं प्रथमम् आरक्षितं भविष्यति। यदि कस्याञ्चित् पञ्चायतायां अनुसूचितजातिजनसंख्या पञ्च- प्रतिशतात् न्यूना अस्ति, तर्हि तत्पदं तस्मै वर्गाय न आरक्षितं भविष्यति।
*हिमाचलप्रदेशे पञ्चायतराजसंस्थानां निर्वाचने नूतनः आरक्षण-क्रमावली प्रवर्तिष्यते। अनेन पञ्चायतनिर्वाचन-प्रक्रियायाः अनिश्चितता पूर्णतया समाप्ता अस्ति।*

**-अनिरुद्धसिंहः, पञ्चायतराजमन्त्री**

**अनुसूचितजात्यां महिलाभ्यः पञ्चाशत्-प्रतिशतं पदानि**

अनुसूचितजात्यै आरक्षितेषु समस्तपदेषु पञ्चाशत्-प्रतिशतं पदानि महिलाभ्यः भविष्यन्ति। यस्यां पञ्चायतायाम् अनुसूचितजाति-महिलानां संख्या अधिका अस्ति, तत्र प्रथमं पदम् आरक्षितं भविष्यति। अनुसूचितजाति-जनजातिवर्गयोः सुरक्षितस्थानानि पूर्वं निश्चितानि भविष्यन्ति, अनन्तरं महिलाभ्यः आरक्षणं प्रवर्तिष्यते। यदि कस्याञ्चित् क्षेत्रे अनुसूचितजाति अथवा जनजातिजनसंख्या न्यूनास्ति, तर्हि सामान्यवर्गीय- महिलाभ्यः प्राधान्यं दास्यते।

**जनसंख्या-अनुपातः भविष्यति आधारः**

पञ्चायतासु प्रतिनिधीनां अतिरिक्तं पञ्चायतसमिति तथा जिलापरिषद्सदस्यानां निर्वाचनक्षेत्राणां वार्डानां च आरक्षणं जनसंख्या-अनुपातेन एव निर्धार्यते।

# 'आईआरसीटीसी' (IRCTC) इत्यस्य जालपुटे 'हिमाचल-पर्यटन-निगमस्य' यात्रा-सङ्कुलानि आरक्षितानि भविष्यन्ति



**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेश-पर्यटन-विकास-निगमस्य (HPTDC) यात्रा-सङ्कुलानि (Tour Packages) तथा 'अपकर्षपत्राणि' (Discount Cards) अधुना 'आईआरसीटीसी' (IRCTC) इत्यस्य जालपुटे अपि आरक्षयितुं (Booking) शक्यन्ते। सोमवासरे पर्यटन-निगमस्य प्रबन्ध-निदेशकः डॉ. राजीवकुमारः नवदेहलीस्थे 'आईआरसीटीसी' संस्थायाः निगमित-कार्यालयस्य अध्यक्षेण प्रबन्ध-निदेशकेन च सञ्जयकुमार जैन महोदयेन सह मिलित्वा अस्मिन् विषये विचार-विमर्शं कृतवान्। विगतेषु दिनेषु उभयोः संस्थयोः मध्ये हस्ताक्षरितस्य 'सहमति-ज्ञापनस्य' (MoU) अनन्तरं भविष्यस्य व्यावसायिक-सम्भावनानां अन्वेषणाय एषा गोष्ठी आयोजिता। पर्यटन-निगमस्य भोजनालयेषु प्रकोष्ठाणां आरक्षणाय तथा अपकर्ष-पत्राणां (Discount Cards) धन-प्रदानाय अपि आईआरसीटीसी-संस्थायाः 'पेमेण्ट्-गेटवे' (Payment Gateway) इत्यस्य प्रयोगः भविष्यति, आरक्षणं च पर्यटन-निगमस्य जालपुटे एव सुनिश्चितं (Confirm) भविष्यति।गोष्ठ्याः अवसरे धूम्रशकटं (Train), भोजनालयं (Hotel) तथा च प्रेक्षणीय-स्थलानि (Sightseeing) एकीकृत्य एकं 'सर्व-समावेशक-हिमाचल-सङ्कुलं' (All in One Himachal Package) निर्मातुं चर्चा कृता। आईआरसीटीसी-संस्थायाः सम्पूर्णे देशे कोटिशः उपयोक्तारः सन्ति, पर्यटन-निगमस्य प्रयासः अस्ति यत् एतेषां ग्राहकाणां साक्षात् प्राप्तिः भवेत्। वर्तमानकाले पर्यटन-निगमः आर्थिक-आह्वानैः सह युद्ध्यति, अतः आईआरसीटीसी-साहाय्येन निगमः स्वस्य राजस्वं वर्धयितुं प्रयतते। पर्यटन-निगमस्य प्रबन्ध-निदेशकः डॉ. राजीवकुमारः अवदत् यत् निगमः अधुना विविध-संस्थाभिः निगमित-गृहैः (Corporate Houses) च सह समन्वय-वर्धनस्य योजनां रचयति, येन पर्यटन-निगमः आर्थिकरूपेण 'आत्मनिर्भरः' भवितुं शक्नोति। अनया सन्धिना न केवलं पर्यटकाः श्रेष्ठाः सुविधाः प्राप्स्यन्ति, अपितु हिमाचलस्य पर्यटनं वैश्विक-मानचित्रे नूतनां परिचयं लप्स्यते।

# हिमाचलप्रदेशेः आभा-परिचयपत्रं ज्ञापयिष्यति यत् चिकित्सालये कया परिचारिकया सेवा कृता; अस्मिन् पोर्टले परिचारिकाणां पञ्जीकरणं आरब्धम्



**हिमसंस्कृतवार्ताः- शिमला।**देशस्य अथवा प्रदेशस्य कस्मिंश्चित् चिकित्सालये अधुना सुकरतया ज्ञातुं शक्यते यत् रोगिणः उपचारः कया परिचारिकया कृतः। एतदर्थम् आभा-परिचयपत्रम् अधिकं प्रभावीकरणीयम् अस्ति। स्वास्थ्यसुविधानां उन्नयनदिशि विभागेन महत्त्वपूर्णं पदं कृत्वा प्रदेशव्यापिनि हेल्थ- प्रोफेशनल- पोर्टल- अन्तर्गतं परिचारिकाणां पञ्जीकरणप्रक्रिया आरब्धा अस्ति।
अनेन रोगिणः चिकित्सालये निवासकाले वार्डे प्रदत्तानि औषधानि तथा उपचारसम्बद्धाः सर्वे विवरणाः अङ्कीयरूपेण उपलब्धाः भविष्यन्ति। उल्लेखनीयं यत् प्रदेशस्य चिकित्सालयेषु आभा- लेखपत्रेन पत्रक-निर्माणकार्यं प्रारब्धम् अस्ति, किन्तु अद्यापि रोगिपत्राणि हस्तलिखितरूपेण लिख्यन्ते। आगामिषु दिनेषु संगणकीकृत- रोगिपत्र- व्यवस्था प्रवर्तिष्यते। रोगी यस्य चिकित्सकस्य परीक्षणं कर्तुम् इच्छति, तस्य ओपीडी-कक्षे पत्रकं स्वयमेव स्थानान्तरितं भविष्यति। ततः लिखितानि औषधानि तथा परीक्षणसम्बद्धाः सूचनाः अपि ऑनलाइनरूपेण उपलब्धाः भविष्यन्ति।यदि रोगी चिकित्सालये प्रविष्टः क्रियते, तर्हि तस्य सम्पूर्णं दत्तांशः ऑनलाइनरूपेण परिचारिकायाः समीपे भविष्यति। रोगिणः निष्क्रमणानन्तरं यदि सः अन्यत्र परीक्षणं करवति, तर्हि ऑनलाइन- अभिलेखद्वारा तस्य पूर्व-मेडिकल-इतिहासः अपि द्रष्टुं शक्यते।अधुना आभा-परिचयपत्रे रोगिणः उपचारं कृतवत्याः परिचारिकायाः नाम अपि अंकितं भविष्यति। अद्यावधि अस्मिन् पोर्टले केवलं चिकित्सकानाम् अभिलेखाः एव उपलब्धाः आसन्। अधुना तत्र सर्वकारी तथा निजी-चिकित्सालयेषु कार्यरत-परिचारिकाणां पञ्जीकरणं क्रियते। अनेन रोगिणां कृते सूचनाप्राप्तिः सुलभा भविष्यति। परिचारिकाणां कृते अद्वितीया हेल्थ- प्रोफेशनल- परिचयसंख्या निर्मीयते। एतत् कार्यम् आयुष्मान- भारत- योजनायाः अन्तर्गतं क्रियते।

**सहायकीय-चिकित्सक कर्मचारिणः अपि अन्तर्भवन्ति**

प्रदेशे परिचारिकाणां सह-चिकित्सक -कर्मचारिणां अपि पञ्जीकरणं क्रियते। ये चिकित्सकाः अद्यापि अपञ्जीकृताः सन्ति, तेषां दत्तांशः अपि पोर्टले उपारोप्यते। स्वास्थ्यविभागेन आगामिषु दिनेऽu सर्वेषां स्वास्थ्यकर्मचारिणां पञ्जीकरणप्रक्रिया पूर्णतां नेतुम् लक्ष्यं निर्धारितम् अस्ति। नोडल- अधिकारीणां प्रति निर्धारितकाले लक्ष्यसिद्धये निर्देशाः दत्ताः सन्ति।

**योजनया जनानां सुगमता**

आयुष्मान- भारत- डिजिटल- मिशनस्य अन्तर्गतं परिचारिका- पैरा- मेडिकल-कर्मचारिणः तथा चिकित्सकाः हेल्थ- फेसिलिटी-पोर्टले पञ्जीकृताः भवन्ति। प्रदेशव्यापिषु निजी- सर्वकारी- चिकित्सालयेषु कार्यरत-कर्मचारिणां पञ्जीकरणेन जनानां कृते सुविधा वर्धिष्यते। सर्वेषां कृते अद्वितीया परिचयसंख्या अपि निर्मीयते।

**-रविन्द्रकुमारः, समन्वयकः, आयुष्मान- भारत- कार्यक्रमः, सोलनम्**

**सुविधाविवरणप्राप्तिः सुलभा भविष्यति**

सरकारी- निजी- चिकित्सालयाः, निजिचिकित्सालयाः, औषधालयाः, अन्ये स्वास्थ्यसंस्थानानि आयुष्मान- भारत- डिजिटल- मिशन- पोर्टले पञ्जीकरणं करिष्यन्ति। पञ्जीकरणानन्तरम् एते संस्थानाः राष्ट्रीय- अङ्कीय (डिजिटल) स्वास्थ्य-प्रणाल्या सह संयोजिताः भविष्यन्ति। अस्मिन् डायग्नोस्टिक-प्रयोगशालाः, फार्मेसी- संस्थानानि, सर्वाः चिकित्सा-पद्धतयः चापि अन्तर्भवन्ति। अनेन स्वास्थ्यसुविधानां विवरणप्राप्तिः अत्यन्तं सुलभा भविष्यति।

# इन्दिरा गान्धी मातृ शिशु सङ्कल्प योजनां प्रारप्स्यते सर्वकारः, २०७ कोटिरूप्यकाणां भविष्यति व्ययः



हिमसंस्कृतवार्ताः - शिमला। मातृ-शिशूनां उत्तम-स्वास्थ्य-रक्षणाय कुपोषण-समस्यायाः निवारणाय च राज्यसर्वकारेण २०७.११ कोटिरूप्यकाणां व्ययेन 'इन्दिरा गान्धी मातृ शिशु सङ्कल्प योजना' इति आरब्धुं निर्णयः गृहीतः। अस्याः योजनायाः अन्तर्गतं षड्वर्षात् न्यूनवयस्केभ्यः बालकेभ्यः, गर्भवतीभ्यः महिलाभ्यः, धात्रीभ्यः (स्तनपानं कारयन्तीभ्यः) मातृभ्यः च उच्च-गुणवत्तायुक्तं 'प्रोटिन्', आवश्यक-कॅलरी, महत्वपूर्ण-सूक्ष्म-पोषकतत्त्वयुक्तं च पूरक-पोषणं प्रदास्यते। सम्पूर्णे प्रदेशे २,९९,४८८ पात्र-लाभार्थिनः अस्याः योजनायाः लाभं प्राप्स्यन्ति इति लक्ष्यं निर्धारितम्।

एषा आरम्भः जीवनस्य प्रथम-सहस्र-दिवसानां (१००० Days) महत्वपूर्ण-कालखण्डे समन्वित-पोषण-स्वास्थ्य-परिचर्याभिः सह पीढी-दर-पीढी प्रचलन्तीं कुपोषण-समस्यां दूरीकर्तुं केन्द्रीकृता भविष्यति। अस्याः उद्देश्यं शिशु-मृत्युदरं न्यूनं करणीयं, रोगग्रस्ततायाः निवारणं तथा समग्र-पोषण-परिणामेषु सुधारः करणीयः अस्ति।

### योजनायाः मुख्याः अंशाः तान्त्रिक-प्रबन्धनं च

योजनायाः अन्तर्गतं गम्भीर-कुपोषितानां (SAM) तथा मध्यम-कुपोषितानां (MAM) बालकानां, न्यून-जन्म-भार-युक्त-शिशूनां च शीघ्रं परिज्ञानं, निरन्तर-निरीक्षणं प्रभावशालि-प्रबन्धनं च सुनिश्चितं भविष्यति।

> क्षमता-वर्धनम्: अग्रपङ्क्ति-कर्तॄणाम् कृते प्रशिक्षण-कार्यक्रमाः आयोजयिष्यन्ते येन ते रक्तक्षयः (Anemia), अतिसारः (Diarrhea), निमोनिया-सदृशानां स्वास्थ्य-चुनौतीनां साफल्येन सामनं कर्तुं शक्नुवन्ति।

> पोषक-आहारः - योजनायाः अन्तर्गतं वैज्ञानिकाधारेण निर्मितः, सूक्ष्म-पोषकतत्त्व-युक्तः 'फोर्टिफाइड' खाद्य-प्रीमिक्सः वितरिष्यते। प्रोटिन्-पूर्तये दुग्धं अण्डानि च अपि दीयन्ते।

### निरीक्षणं अन्तर्विभागीय-समन्वयः च

गम्भीर-कुपोषित-बालकानां कृते विशेष-पोषण-अनुशासनम् आरप्स्यते। पोषण-पुनर्वास-केन्द्राणि 'होम-बेस्ड-न्यूबॉर्न-केयर' (HBNC) इत्यनेन सह संलग्नानि भविष्यन्ति। आशा-अङ्गणवाडी-कर्तृभ्यः विशेष-प्रोत्साहन-राशिः अपि दीयते। निरीक्षण-तन्त्रं सुदृढं कर्तुं 'पोषण-ट्रैकर', 'मातृ-शिशु-सुरक्षा-पत्र' (MCP Card) इत्यादीनां प्रयोगः भविष्यति।

अस्याः योजनायाः प्रभावि-क्रियान्वयनाय स्वास्थ्य-विभागः, राष्ट्रिय-स्वास्थ्य-मिशनम्, जल-शक्ति-विभागः, ग्रामीण-विकास-विभागः तथा शालेय-शिक्षा-विभागस्य मध्ये संस्थागत-समन्वयः स्थापितः भविष्यति।

मुख्यमन्त्री उक्तवान् यत् कुपोषणं राज्ये एकः गम्भीरः सार्वजनिक-स्वास्थ्य-विषयः अस्ति, सर्वकारः च एतं निवारयितुं कटिबद्धः अस्ति। वञ्चित-वर्गेभ्यः पौष्टिक-आहारस्य उपलब्धता सुनिश्चितं कृत्वा कुपोषणस्य सामाजिक-आर्थिक-भारः न्यूनीभविष्यति तथा च एकस्य स्वस्थस्य समृद्धस्य च समाजस्य निर्माणे साहाय्यं प्राप्स्यते।

# पितामह्याः मृत्युप्रमाणपत्रं प्राप्तुं शिमलां प्राप्तः आङ्ग्ल-दम्पतिः, १८९४ तमे वर्षे अभवत् मृत्युः



हिमसंस्कृतवार्ताः - शिमला। स्वकीयायाः पितामह्याः मृत्युप्रमाणपत्रं प्राप्तुं इङ्ग्लैण्ड-देशस्य एकं दम्पतिः सोमवासरे शिमला-नगरनिगमं प्राप्तवान्। दम्पतिना अत्र प्रमाणपत्राय आवेदनं कृतम्। इङ्ग्लैण्ड-निवासी टैली ब्लेसवैथ महोदयः अवदत् यत् तस्य पितामही एलिजाबेथ ह्यूज महोदया शिमला-नगरे मृता आसीत्। सा ब्रिटिश-काले सेनायां सेवां करोति स्म तथा च १८९४ तमे वर्षे तस्याः निधनम् अभवत्। आवेदनोत्तरं नगरनिगमेन वृत्तान्तानां (Records) अन्वेषणं कारितम्। ब्रिटिश-काले ग्रीष्मकालीनराजधान्यां आङ्ग्ल-अधिकारिणः तेषां परिवारसदस्याश्च निवसन्ति स्म, अतः तेषां जन्म-मृत्यु-वृत्तान्ताः अद्यापि निगमे सुरक्षिताः सन्ति। एतस्मात् कारणात् यदा सोमवासरे इङ्ग्लैण्ड-दम्पति नगरनिगमं प्राप्तवत्, तदा निगमस्य स्वास्थ्यशाखया वृत्तान्तानुसन्धाने साहाय्यं कृतम्।

अस्मिन् क्रमे स्वास्थ्यशाखायाः दलेन यदा वृत्तान्तानां परीक्षणं कृतं, तदा दम्पतिना निर्दिष्टायां तिथौ कोऽपि उल्लेखः न प्राप्तः। तदनन्तरं १८९३ तथा १८९५ वर्षयोः अपि वृत्तान्ताः अन्वेषिताः, परन्तु तत्रापि किमपि न लब्धम्। अपरतः नगरनिगमस्य संयुक्त-आयुक्तः डॉ. भुवन शर्मा अवदत् यत् यस्याः महिलायाः कृते दम्पति शिमलां प्राप्तवत्, तस्याः मृत्युः शिमला-नगरे न अभवत्। सम्भवतः तस्याः निधनं अन्यत्र कुत्रचित् जातं स्यात्। तथापि यदि आगामिषु दिनेषु कापि सूचना प्राप्यते, तर्हि सम्बन्धित-दम्पतिं दूरभाषेण सूचयिष्यते। नगरनिगमे १८७० तमे वर्षात् आरभ्य ब्रिटिश-कालस्य वृत्तान्ताः उपलब्धाः सन्ति। एते वृत्तान्ताः 'डिजिटाइज' (अङ्कीकृताः) सन्ति, येन अन्वेषणं सुकरं भवति।

# नेपालदेशे चरौण्डीक्षेत्रं निकषा भीषण-बस दुर्घटना



हिमसंस्कृतवार्ताः - नेपालदेशे चरौण्डी-नामकं स्थानं निकषा भीषण-बसयान-दुर्घटना अभवत्। पोखरातः काठमाण्डू-नगरं प्रति गच्छत् यात्रिवाहि-बसयानम् अकस्मादेव मार्गात् अपसृत्य त्रिशूली-नद्यां निपतिता। दुर्घटनायाः अनन्तरं क्षेत्रे तुमुल-कोलाहलः अभवत्। प्रत्यक्षदर्शिनां कथनानुसारेण बसयानं तीव्रवेगेन धावमानम् आसीत्, येन तत् सहसैव नियन्त्रणहीना अजायत। अधिकृत-सूचनानुसारेण एतस्यां दुर्घटनायां न्यूनातिन्यूनाः सप्तदश यात्रि-जनाः मृत्युम् उपगताः सन्ति, येषु द्वौ वैदेशिक-नागरिकौ अपि स्तः। अथ च एकादशान्ये पुरुषाः द्वे स्त्रियौ च मृतकेषु अन्तर्भूताः सन्ति। अन्येषां मृतकानां परिचय-निर्णय-कार्य अधुनापि प्रवर्ततेतराम्। बहवः यात्रिणः गम्भीरतया व्रणिताः आहताश्च सन्ति, ये समीपस्थेषु चिकित्सालयेषु एव उपचारार्थं प्रवेशिताः सन्ति। दुर्घटनानन्तरं स्थानीय प्रशासनं, सुरक्षादलानि, उद्धार-दलानि शीघ्रमेव घटनास्थलं प्राप्य जनोद्धारकार्येषु निरतानि सन्ति। इमे सहायकाः जनाः नद्याः अन्तस्तले अपि अन्वेषण-कार्यं कुर्वन्तो वर्तन्ते। दुर्घटनायाः यथार्थं कारणं ज्ञातुं आधिकारिक अनुसन्धानं प्रारब्धम् अस्ति। अनया दुःखदया घटनया सम्पूर्ण नेपालदेशे शोक-तरङ्गाः प्रसारिताः सन्ति ।

# भारत-टैक्सी-समवायस्य सारथिभिः सह मिलितवान् केन्द्रीय-मन्त्री अमित शाहः

हिमसंस्कृतवार्ताः - केन्द्रीय-मन्त्री अमित शाहः भारत-टैक्सी समवायस्य सारथिभिः सह मिलित्वा अस्याः सहकार-संस्थायाः उद्देश्यान् परिचर्चितवान् । असौ उदैरयत् यत् भारत-टैक्सीति समवायः केवलं लाभार्जनाय नास्ति, किन्तु सारथिनाम् आर्थिकसशक्तीकरणं कर्तुमपि अस्य लक्ष्यमस्ति। सारथयः एव अस्य संस्थायाः वास्तविकाः स्वामिनः सन्ति। अस्य लक्ष्यं अस्ति यत् ते स्वगृहपरिवारस्य सुचारु संचालनं कर्तुं समर्थाः स्युः साकमेव अधिकतमं लाभमपि प्राप्नुयुः। तत्रैव प्रशासनेतर समवायाः केवलं समवाय-स्वामिनां समृद्धिवर्धने निरताः भवन्ति, परन्तु भारत-टैक्सी समवाये स्वामिनः अपि सारथयः एव भवन्ति अतः ते एव लाभं प्राप्नुवन्ति। एवं प्रकारेण एषा सहकार-संरचना अन्य समवायानाम् अपेक्षायां भिन्नतया वर्तते स्थापिता।

# शिक्षा-मन्त्रिणा धर्मेंद्र-प्रधानेन

## 'टीचर ऐप 2.0' इत्यस्य शुभारम्भः कृतः



हिमसंस्कृतवार्ता। नवदिल्ल्यां शिक्षामन्त्री धर्मेंद्र प्रधानः 'भारती एयरटेल' तथा 'सी.के. 12 फाउंडेशन' इत्यनयोः सहयोगेन निर्मितस्य, कृत्रिम-बुद्धि (AI) चालितस्य 'टीचर ऐप 2.0' इत्यस्य उद्घाटनं कृतवान्। कार्यक्रमं सम्बोधयन् श्री प्रधानः अवदत् यत् एषः ऐप-प्रविधिः विद्यालयीयशिक्षकान् सशक्तिकर्तुं तथा तेभ्यः सहायतां प्रदातुं कृत्रिम-बुद्धि-आधारितः एकः 'प्रौद्योगिकी-सहयोगी' अस्ति।तेन उक्तं यत् एतत् पटलं शिक्षणप्रक्रियां अधिकाधिकं आकर्षिकां उत्पादिकां च कर्तुं शिक्षकेभ्यः विविधानि उपकरणानि, पाठ्यसामग्रीं, 'डैशबोर्ड' सदृशाः सुविधाः च प्रदास्यति। श्री प्रधानः न्यगादीत् यत् सर्वकारः शिक्षाक्षेत्रे एआई (AI) इत्यस्य प्रयोगं प्रवर्धयितुं तीव्रगत्या कार्यं कुर्वन् अस्ति।अस्य ऐप-तन्त्रस्य शुभारम्भः देशे प्रचलन्त्यां एआई-क्रान्तौ गतिं प्रदास्यति। सः अवदत् यत् अनेन अधिगमस्य स्तरे परिष्कारं भवितुं शक्नोति, छात्राणां सहभागिता वर्धेत तथा च शिक्षायां 'वैयक्तिकीकरणम्' (Personalization) प्रोत्साहनं प्राप्स्यति।श्री प्रधानः सहयोगी-संस्थाः 'देशी-भाषा-शिक्षण-प्रतिमानानाम्' (Native Language Learning Models) उपयोगं कर्तुं तथा च अधिकाधिकं भारतीयभाषासु प्रशिक्षण-साधनानि उपलब्धं कारयितुम् आग्रहं कृतवान्।

# रामटेके भरतमुनि-ललितकला-केन्द्रेण गायन-प्रतियोगितायाः सफलं आयोजनम्



**हिमसंस्कृतवार्ताः - डॉ रेणुका बोकारे,रामटेकम्।** कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयस्य 'भरतमुनि-ललितकला-केन्द्रस्य' तत्त्वावधाने एका भव्या गायन-प्रतियोगिता साफल्येन आयोजिता। अस्यां प्रतियोगितायां रामटेक-नगरस्य समीपवर्ति-क्षेत्राणां च विविधेभ्यः विद्यालयेभ्यः प्रायः षष्टिः (६०) लघु-बालकाः सोत्साहं भागं गृहीतवन्तः।
एषः कार्यक्रमः माननीय-कुलगुरूणां प्रो. अतुल-वैद्य-महोदयानां दिव्य-प्रेरणया सम्पन्नः अभवत्। कार्यक्रमस्य मुख्यातिथि-रूपेण प्रो. ललिता-चन्द्राते-जोशी महोदया उपस्थिता आसीत्। विशिष्टातिथिरूपेण कुलसचिवः डॉ. रोशन-आलोने, वित्ताधिकारी श्री-विजयेंद्र-पाण्डेयः, पुस्तकालयाध्यक्षः डॉ. दीपक-कापडे च गौरवमयीं उपस्थितिं दर्जितवन्तः।
सर्वैः अतिथिभिः दीपप्रज्वलनं कृत्वा कार्यक्रमस्य विधिवत् शुभारम्भः कृतः। प्रतियोगितायां श्रेष्ठ-प्रदर्शनं कृतवद्भ्यः प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चम-स्थानं प्राप्तवद्भ्यः छात्रेभ्यः विद्यापीठस्य पक्षतः नकद-धनराशिः गौरव-प्रमाणपत्राणि च प्रदाय पुरस्कृतं कृतम्। अस्मिन् अवसरे भरतमुनि-ललितकला-केन्द्रस्य सञ्चालकः डॉ. अनिल-कुमार-दुबे महोदयः निर्णायक-मण्डले उपस्थितः आसीत्।सञ्चालकेन सूचितं यत् २०१९ तमे वर्षे केन्द्रस्य स्थापनानन्तरं विश्वविद्यालयः निरन्तरं सृजनात्मक-गतिविधीनां सञ्चालनं करोति। सः अवदत् यत् कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः स्वकीयेभ्यः सांस्कृतिक-कार्यक्रमेभ्यः सम्पूर्णदेशे विश्रुतं स्थानं धारयति। अधुना यावत् अस्य केन्द्रस्य माध्यमेन प्रायः ४५० छात्रेभ्यः सङ्गीतस्य (गायनस्य) प्रशिक्षणं दत्तं वर्तते।

# मणिपुरी-चलच्चित्रं 'बूंग' प्रतिष्ठितं 'बाफ्टा' पुरस्कारं विजितवत्




प्रधानमन्त्री नरेन्द्र मोदी श्रेष्ठ-बाल-पारिवारिक-चलच्चित्रवर्गे प्रतिष्ठितं 'ब्रिटिश एकेडमी ऑफ फिल्म एंड टेलीविजन आर्ट्स' (बाफ्टा) पुरस्कारं प्राप्तुं मणिपुरी-भाषायाः चलच्चित्रस्य 'बूंग' (Boong) इत्यस्य दलाय वर्धापनानि दत्तवान्। एकस्मिन् 'सोशल मीडिया' सन्देशे श्री मोदी अवदत् यत् एषः क्षणः विशेषतः मणिपुरराज्यस्य कृते हर्षस्य विषयः अस्ति। प्रधानमन्त्रिणा उक्तं यत् एषः पुरस्कारः देशस्य अपारायाः सृजनात्मकप्रतिभायाः अपि परिचायकः अस्ति।

# श्रीवामदेवसंस्कृतमहाविद्यालये पञ्चत्रिंशद्बटूनां यज्ञोपवीतसंस्कारः



**चित्रकूटधाम बांदा ||** षड्विंशत्यधिकद्विसहस्रतमे कृष्टाब्दे द्वितीयमासस्य द्वाविंशतितमे दिनाङ्के रविवारसरे श्रीवामदेवसंस्कृतमहाविद्यालये पञ्चत्रिंशद्बटूनां यज्ञोपवीतसंस्कारकार्यक्रमः सम्पन्नोऽभवत्। यतो हि वैदिककालीनायाः शिक्षाया आरम्भः उपनयनसंस्कारादेव भवति स्म तस्माद्धेतोः गुरुजनानां सान्निध्ये बटूनामुपनयनसंस्कारः व्यधायि।
आयोजितेऽस्मिन् कार्यक्रमे बांदानगरस्य सदरविधायकवर्यः श्रीमान्प्रकाशद्विवेदिवर्यः मुख्यातिथिरूपेण पूर्वजनपदपञ्चायताध्यक्षः जगरामसिंहचौहानमहाशयः अथ च विशिष्टातिथिरूपेण भारतीयजनतापक्षस्य वरिष्ठनेता राष्ट्रियपरिषदः सदस्यश्च सन्तोषगुप्ता सारस्वतातिथिरूपेण च गरिमामय्या उपस्थित्या विराजन्ते स्म।श्रीवामदेवसंस्कृतमहाविद्यालयस्य प्राचार्यस्य डॉ.नरवदेनारायणदीक्षितवर्याणाम् अध्यक्षतायाम् अस्मिन् कार्यक्रमे बटवः वैदिकमन्त्रैः गायत्रीमन्त्रम् अशृण्वन् प्रतिदिनं गायत्रीजपानुष्ठानस्य सङ्कल्पं च अगृह्णन्।कानपुर-सीतापुर-हमीरपुर-महोबा-बाँदानगराणां सुदूरक्षेत्रेभ्यः आगता अनेके विद्यालयाद् बहिःस्थाः छात्रा अपि स्वकीययज्ञोपवीतसंस्कारम् अकारयन्।आदौ कार्यक्रमस्य शुभारम्भे डॉ. इच्छारामपाठकः पञ्चाङ्गपूजनपूर्वकं सर्वदेवानां पूजनम् अकारयत्।आचार्यशुक्लदीनदयालेन अन्यैश्चाचार्यैः वैदिकमन्त्रोच्चारणविधिभिः ब्रह्मचर्यनियमानां विधिवत्परिपालनाय बटुभ्यो निर्देशान् अददुः। अग्नौ आहुतिप्रदानेन सह ते सूर्यस्य सरस्वत्याश्च आराधनं चक्रिरे। अन्ते वादित्रघोषपुरःसरं शोभायात्रा नगरभ्रमणं च बलखण्डीनाकास्थलात् प्रावर्तत। तत्र बटवः महेश्वरीदेवीमन्दिरे मातुर्दर्शनं वन्दनं च कृत्वा पुनः कोतवालीमार्गेण क्षुद्रविपणिमार्गेण च महाविद्यालयप्राङ्गणं प्रत्यागच्छन्।विद्यालयस्य प्रबन्धकः गुप्तजतिनः अध्यक्षः गुप्तमेवालालश्च सर्वभ्यः अभिभावकेभ्यः अतिथिभ्यश्च विद्यालयपरिसरे भोजनप्रसादस्य व्यवस्थाम् अकुरुताम्।अस्मिन्नवसरे विद्यालयस्य आचार्येषु आचार्य अभयपाण्डेयः, श्रीमती डॉ मनोजत्रिपाठी, श्रीमान् अजयसिंहः, श्रीरमाकान्तत्रिपाठी, तथा सूरजबलीगुप्त, डॉ. ओमप्रकाश तिवारी, काशीतः समागताः वैदिकविद्वांसः मैथिलविद्वांसः गडरियेतिनामकसंस्कृतविद्यालयस्य डॉ. त्रिपाठिन्मनहरणः इत्यादयश्चोपस्थिताः अभवन्।

# हेमवतीनन्दनबहुगुणागढ़वाले केन्द्रीयविश्वविद्यालये

## पौडीसंस्कृतविभागे "वैश्वीकरणस्य नैतिकता" विषयेस्मिन् व्याख्यानम्







**कुलदीपमैन्दोला।** पौड़ीजनपदे हेमवतीनन्दनबहुगुणागढ़वालस्य केन्द्रीय-विश्वविद्यालयस्य बी.जी.आर.-पौडीपरिसरे संस्कृतविभागेन श्रृंखलायां तृतीय-व्याख्यानं समायोजितम्।
कार्यक्रमस्य शुभारम्भः केन्द्रीयसंस्कृत-विश्वविद्यालयस्य श्रीरघुनाथकीर्तिपरिसरस्य आचार्येण डॉ. अङ्कुरवत्स-महोदयेन छात्रैः सह वैदिक-मङ्गलाचरणेन कृतः।अस्मिन् अवसरे मुख्यवक्तृरूपेण पद्मश्री-सम्मानितः प्रख्यातविद्वान् पुष्पेश पंत-महोदयः "वैश्वीकरणस्य नैतिकता" अस्मिन् विषये सारगर्भितं विचारोत्तेजकं च व्याख्यानम् अददात्। तेन उक्तं यत् वैश्वीकरणस्य मूलभावना प्राचीनकालादेव समावेशिता-सहमति-सहअस्तित्व-आधारिता अभूत्, किन्तु आधुनिककाले तस्य नैतिकपक्षे पुनर्विचारः आवश्यकः। कार्यक्रमस्य अध्यक्षता परिसरनिदेशकः प्रो. यू.सी. गैरोला-महोदयः अकरोत्। संचालनं संस्कृतविभागस्य प्रभारी-विभागाध्यक्षेन डॉ. दिनेशचन्द्रपाण्डेय-महोदयन कृतम्। अन्ते इतिहासविभागस्य डा. नीलमनेगी-महोदयया धन्यवादज्ञापनं प्रस्तुतम्।

### भारतीयज्ञानपरम्परायाः वैश्विक-नैतिकदृष्टेः प्रतिपादनम्

संस्कृतविभागेन आयोजिते अस्मिन् व्याख्याने पुष्पेश पंत-महोदयः अवदत् यत् विंशतिशताब्द्याः उत्तरार्धे उदारवादी-पूंजीवादी-शक्तिभिः वैश्वीकरणस्य एकः विशिष्टः प्रतिदर्शः विश्वे आरोपितः, यस्य नैतिकपरिमाणेषु गम्भीरः विचारः करणीयः अस्ति। तेन भारतीयपरम्परायां निहितस्य नैतिकचिन्तनस्य बहुलता, सार्वभौमिकदृष्टिश्च विशदतया विवृता। तेन उक्तं यत् भारतीयज्ञानपरम्परा "वसुधैव कुटुम्बकम्" इति भावनया सदा प्रेरिता अस्ति। अस्मिन् कार्यक्रमे समन्वयिका प्रो. कुसुमडोबरियाल-महोदया, विविधविभागानां शिक्षकाः, शोधार्थिनः बहवः छात्राः च उपस्थिताः आसन्

# केन्द्रीयवस्त्रमन्त्री गिरिराजसिंहः- २०३१ पर्यन्तं १० अर्ब डॉलर परिमितं हस्तशिल्प-निर्यात-लक्ष्यम्



केन्द्रीयवस्त्रमन्त्री गिरिराजसिंहः उक्तवान् यत् सर्वकारेण २०३१ पर्यन्तं १० अर्ब डॉलर परिमितस्य हस्ततन्तु (Handloom) निर्यातस्य लक्ष्यं निर्धारितम् अस्ति। नवदिल्ल्यां राष्ट्रिय-हस्ततन्तु-विकास-निगमस्य (NHDC) ४३ तमे स्थापनादिवसे श्रीसिंहः आजीविकायाः संरक्षणे तथा स्वदेशी-उत्पादन-प्रणालीनां प्रवधने हस्ततन्तुक्षेत्रस्य महत्त्वपूर्णभूमिकायाः उल्लेखं कृतवान्। तेन उक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे देशस्य हस्ततन्तुक्षेत्रं 'वैश्विक-आन्दोलने' परिवर्तितं भवति। श्रीसिंहः राष्ट्रिय-निर्माणं सुदृढीकर्तुं तथा नागरिकान् स्वदेशी-वस्त्राणां समर्थनाय प्रोत्साहितुं सर्वकारस्य दृष्टिकोणं पुनः प्रतिपादितवान्। अस्मिन् अवसरे श्रीसिंहः एकस्याः विशेष-हस्ततन्तु-प्रदर्शिन्याः अपि उद्घाटनं कृतवान्, या आगामि-मासस्य २ दिनाङ्क पर्यन्तं चलिष्यति। सः NHDC संस्थायाः भाविनि-योजनानां रूपरेखां प्रस्तूय तन्तुवाय-समुदायस्य (बुनकर) सक्तीकरणे निगमस्य निरन्तर-प्रयासानां प्रशंसां कृतवान्।

# भूतपूर्व-रेलमन्त्री, राज्यसभा-सांसदः च मुकुलरायः दिवङ्गतः; प्रधानमन्त्रिणा गृहमन्त्रिणा च शोकः प्रकटितः



प्रधानमन्त्री नरेन्द्र मोदी भूतपूर्व-रेलमन्त्रिणः मुकुलरायस्य निधने गभीरं दुःखं व्यक्तवान्। 'सोशल मीडिया' सन्देशे सः अवदत् यत् मुकुलरायः स्वस्य राजनैतिकानुभवाय समाजसेवा-प्रयासेभ्यः च सदैव स्मरिष्यते। गृहमन्त्री अमित शाहः अपि मुकुलरायस्य परिवारं प्रति स्वसंवेदनां प्रकटितवान्। मुख्यमन्त्री ममता बनर्जी एकस्मिन् सन्देशे उक्तवती यत् सः पश्चिमबङ्गालस्य राजनीति-क्षेत्रे स्वयोगदानाय 'साङ्गठनिक-कौशलाय' च स्मर्तव्यः भविष्यति।पश्चिमबङ्गालस्य विपक्षनेता शुभेन्दु अधिकारी, केन्द्रीयराज्यमन्त्री डॉ. सुकान्त मजुमदारः, काङ्ग्रेस-अध्यक्षः मल्लिकार्जुन खरगे च अपि मुकुलरायस्य निधने गभीरं शोकं प्रकटितवन्तः।दीर्घकालात् स्वास्थ्यसम्बन्धि-समस्याभिः युध्यमानः मुकुलरायः गतदिने प्रातःकाले कोलकातायाः एकस्मिन् निजी-चिकित्सालये अन्तिमं श्वासं गृहीतवान्। तस्य पार्थिवशरीरं विधानसभा-भवनं नीतम्।विधानसभा-अध्यक्षः बिमान बन्द्योपाध्यायः अन्ये विधायकाः च तस्मै श्रद्धाञ्जलिं समर्पितवन्तः। तदनन्तरं तस्य शरीरं 'उत्तर २४ परगना' जनपदे काँचरापाड़ा-स्थितं तस्य 'घटक पुकुर' आवासं प्रति नीतम्।

# वित्तमन्त्री निर्मला सीतारमण महोदया 'परिसम्पत्ति-मुद्रीकरण-योजनायाः' द्वितीयचरणस्य शुभारम्भं कृतवती



वित्तमन्त्री निर्मला सीतारमण नवदिल्ल्यां केन्द्रीयमन्त्रालयानां सार्वजनिकक्षेत्रस्य संस्थानां च कृते 'परिसम्पत्ति-मुद्रीकरण-योजनायाः' (Asset Monetization Scheme) द्वितीयचरणस्य उद्घाटनं कृतवती। अस्याः योजनायाः द्वितीयः चरणः नीति-आयोगेन आधारभूत-संरचना-मन्त्रालयानां परामर्शेन सज्जीकृतः, यः केन्द्रीय-आयव्ययके (Budget) २०२५-२६ मध्ये घोषितस्य 'परिसम्पत्ति-मुद्रीकरण-योजना २०२५-३०' इति शासनादेशस्य आधारे अस्ति।
राष्ट्रिय-मुद्रीकरण-योजना २.० (NMP 2.0) अनुसारं, वित्तवर्षतः २०२५-२६ आरभ्य २०२९-३० पर्यन्तं पञ्चवर्षाणाम् अवधौ केन्द्रीयमन्त्रालयानां सार्वजनिकसंस्थानां च परिसम्पत्ति-मुद्रीकरण-योजनायाः अन्तर्गतं १६ लक्ष-७२ सहस्र-कोटि-रूप्यकाणां मुद्रीकरण-क्षमतायाः अनुमानं वर्तते। अस्मिन् निजीक्षेत्रस्य ५ लक्ष-८० सहस्र-कोटि-रूप्यकाणां निवेशः अपि सम्मिलितः अस्ति। स्वस्य सम्बोधने सुश्री सीतारमण 'राष्ट्रिय-मुद्रीकरण-योजना १.०' इत्यस्य क्रियान्वयने चतुर्वर्षाणां कृते निर्धारितस्य षड्-लक्ष-कोटि-रूप्यकाणां लक्ष्यस्य प्रायः ९० प्रतिशतं प्राप्त्यर्थं सर्वकारस्य सर्वान् मन्त्रालयान्, विभागान्, नीति-आयोगं च प्रशंसितवती।राष्ट्रिय-मुद्रीकरण-योजना २.० नीति-आयोगस्य मुख्य-कार्यकारी-अधिकारिणः (CEO), आधारभूत-संरचना-मन्त्रालयानां सचिवानां, वित्तमन्त्रालयस्य, विधिमन्त्रालयस्य सचिवानां तथा च मुख्य-आर्थिक-परामर्शदातुः उपस्थितौ प्रसारिता।

# नेपालीमहाकविः भानुभक्ताचार्यः



✍ असमप्रदेशीयः, नारदोपाध्यायः

प्रत्येकं जनजातिषु एकः एकः महाजनः भवति एव । तासु जनजातिषु गोर्खाजनजातिः अन्यतमा। अस्यां जनजात्यां भानुभक्ताचार्यः सुप्रसिद्धः कश्चन संस्कृतपण्डितः । तेन महाभागेन वाल्मीकीयं रामायणमहाकाव्यं नेपालीभाषायाम् अनूदितमस्ति, यस्य नाम भानुभक्तीयं रामायणमिति । नेपालीभाषायाः आविर्भावः प्रचलनञ्च ततो हि समभवत् । अतः सः आदिकविः, एवञ्च नेपालीभाषायाः जनकः कथ्यते । ततः पूर्वं जनसमाजे प्रायः संस्कृतादिभाषाः हि प्रचलन्ति स्म । सामान्यजनाः यदा भानुभक्तीयं रामायणं गृहे गृहे पठितुम् आरब्धवन्तः तदा हि इयं भाषा सम्यक्तया प्रसृता अभवत् । महोदयेन प्रश्नोत्तरी, बधूशिक्षा, भक्तमाला इत्यादयः अन्येऽपि सारगर्भितग्रन्थाः नेपालीभाषया विरचिताः उपलभ्यन्ते ।

१३-जुलै, १८६८ तमे ख्रीष्टाब्दे लब्धजन्मः सः धनञ्जय-धर्मावत्योः सुपुत्रः, भानुवत् हि प्रकाशयुक्तः आसीत् । तेन कस्माच्चन घासविक्रेतुः प्रेरणा प्राप्ता आसीत् । घासकर्तकः पशुघासं विक्रीय यत् अल्पमूल्यकं धनं प्रतिदिनम् उपार्जयति स्म तस्य सञ्चयनं कृत्वा अन्ते जलार्थं ग्रामीणानां हिताय च एकस्य कूपस्य निखननकार्यं सम्पादितवान् । निर्धनस्य घासकर्तकस्य उदारकार्यम् अवलोक्य भानुभक्तः गभीरतया विचारितवान् यत् यद्यपि एषः एतावान् निर्धनः जनः, तथापि तस्मिन् एतादृशः महान् अनुभवः, परन्तु अहं पूर्वतः एव धनिके परिवारेऽस्मि, जीवनेऽहं किमपि कीर्तियुतं, महत्कार्यं कर्तुं न शक्नुयां किमिति । एवं प्रकारेण घासविक्रेतातः सः कार्यप्रेरणां प्राप्तवान् आसीत् । ततः हि सः कालान्तरे स्वकीयया कीर्त्या लोके अमरताम् अगच्छत् । धन्याः एतादृशाः महापुरुषाः !

# राँची-नगरतः दिल्लीं गच्छन् 'एअर एम्बुलेंस' विमानं दुर्घटनाग्रस्तम्



राँची-नगरतः दिल्लीं प्रति आगच्छत् एकं 'एअर एम्बुलेंस' (Air Ambulance) विमानं दुर्घटनाग्रस्तं जातम्। प्राथमिकसूचनानुसारं विमाने सप्तजनाः आसन्। दुर्घटनायाः कारणं अद्यापि स्पष्टं नास्ति, परन्तु रक्षणकार्यं तीव्रगत्या प्रचलति।

## "लौकिकन्यायकोशः"
## "अनेकाश्रयन्यायः"

बहूनां दुर्बलानाम् आश्रयणस्य अपेक्षया एकस्य समर्थस्य आश्रयणम् एव श्रेयस्करम् इत्यर्थे अस्य न्यायस्य प्रयोगः भवति।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्

# हास्यकणिका

**पत्न्या सह असत्यं मा वद- कारणं सा जानाति 😍**
**पत्न्या सह सत्यम् अपि मा वदत-** कारणं, यदि आवश्यकता भविष्यति सा ज्ञातुं शक्नोति 🤣